# Shivastuti by Rati

# रतिकृता शिवस्तुतिः

## Document Information

Text title : shivastutiH 5 by rati

File name : shivastutiHrati.itx

Category : shiva

Location : doc_shiva

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Latest update : December 31, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# रतिकृता शिवस्तुतिः

नमः शिवायास्तु निरामयाय नमो शिवायास्तु मनोमयाय ।
नमः शिवायास्तु सुरार्चिताय तुभ्यं सदा भक्तकृपापराय ॥ २६०॥ १॥

नमो भवायास्तु भवोद्भवाय नमोऽस्तु ते ध्वस्तमनोभवाय ।
नमोऽस्तु ते गूढमहाव्रताय नमोऽस्तु मायागहनाश्रयाय ॥ १॥

नमोऽस्तु शर्वाय नमः शिवाय नमोऽस्तु सिद्धाय पुरातनाय ।
नमोऽस्तु कालाय नमः कलाय नमोऽस्तु ते ज्ञानवरप्रदाय ॥ २॥

नमोऽस्तु ते कालकलातिगाय नमो निसर्गामलभूषणाय ।
नमोऽस्त्वमेयान्धकमर्दकाय नमः शरण्याय नमोऽगुणाय ॥ ३॥

नमोऽस्तु ते भीमगणानुगाय नमोऽस्तु नानाभुवनादिकर्त्रे ।
नमोऽस्तु नानाजगतां विधात्रे नमोऽस्तु ते चित्रफलप्रयोक्त्रे ॥ ४॥

सर्वावसाने ह्यविनाशनेत्रे नमोऽस्तु चित्राध्वरभागभोक्त्रे । सविनाशनेत्रे
नमोऽस्तु भक्ताभिमतप्रदात्रे नमः सदा ते भवसङ्गहर्त्रे ॥ ५॥

अनन्तरूपाय सदैव तुभ्यमसह्यकोपाय नमोऽस्तु तुभ्यम् ।
शशाङ्कचिह्नाय सदैव तुभ्यममेयमानाय नमः स्तुताय ॥ ६॥

वृषेन्द्रयानाय पुरान्तकाय नमः प्रसिद्धाय महौषधाय ।
नमोऽस्तु भक्त्याऽभिमतप्रदाय नमोऽस्तु सर्वार्त्तिहराय तुभ्यम् ॥ ७॥
चराचराचारविचारवर्यमाचार्यमुत्प्रेक्षितभूतसर्गम् ।
त्वामिन्दुमौलिं शरणं प्रपन्ना प्रियाप्रमेयं महतां महेशम् ॥ ८॥

प्रयच्छ मे कामयशःसमृद्धिं, पुनः प्रभो जीवतु कामदेवः ॥
प्रियं विना त्वां प्रियजीवितेषु त्वत्तोऽपरः को भुवनेष्विहास्ति ॥ ९॥

प्रभुः प्रियायाः प्रसवः प्रियाणां प्रणीतपर्यायपरापरार्थः ।
त्वमेवमेको भुवनस्य नाथो दयालुरुन्मीलितभक्तभीतिः ॥ २७०॥ ११॥

इति मत्स्यपुराणान्तर्गता रतिकृता शिवस्तुतिः समाप्ता ।

(matsyapurANam, 154. 260-270)

Proofread by Jonathan Wiener wiener78 at sbcglobal.net, NA

*Shivastuti by Rati*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*